ISSN 2583-9020

An Electronic Veda Journal

# वेद वाणी

(vEda vaaNee)

Volume 2, Issue 3, October 2024



Printed and Published by

**Veda Samskruti Samiti**

Malkajgiri

Hyderabad TS

# मत्तविलासप्रहसनस्य साहित्यशास्त्रीया समीक्षा – तृतीयो भागः

## [Literary Study of Mattavilāsaprahasana – A Comedy – Part-3]

**Kamakshi Ramanarayanan**

Arudhra Education and Research Foundation, Lingi Chetty Street, Mannady, Chennai
arudhraresearchfoundation@gmail.com

**Summary**

Mattavilāsaprahasana is a single-act comedy play composed by the Pallava king Mahendra Vikrama Varman (6th – 7th century CE), set in the streets of Kāncīpura. Its plot revolves around the uncouth and hypocritical interactions between a kāpālika, Buddhist monk, and other characters. This is an attempt to study the prahasana from the perspective of a few aspects of sāhitya śāstra. The elements of plot and analysis of characters, were dealt with in part one. Rasa (the essence or soul of the play), aucitya (propriety), alaṅkāra (poetic embellishments), and possible influence of the vernacular were discussed in part two. This third and last part looks at the poetic meters used, the poet’s observations on fragments of ‘less cultured’ segments of the society during his time, and their way of life and the reflection of the poet’s scholarship in various other branches of knowledge. The Part-1 & 2 of the three-part series was published in the vEda vaNee, Volume 2, 1 & 2 issues, respectively.

रसालङ्कारादीन् विचार्याधुना महेन्द्रविक्रमभूपस्य शास्त्रकवित्वमालोच्यतेऽत्र। नानावृत्तगुम्फनेन श्रवणरमणीयं, नानालौकिकशास्त्रीयप्रमेयपरामर्शेन च समाजबुद्धिविवर्धकं भवति मत्तविलासप्रहसनम्।

## I. छन्दोगणना

इह रूपके त्रयोविंशतिः पद्यानि विविधैश्छन्दोभिरुपनिबद्धानि। तेषामावलिरत्र सलक्षणं सङ्गृह्यते।

| छन्दः | पद्यसङ्ख्या | श्लोकानुक्रमणी |
|---|---|---|
| **शार्दूलविक्रीडितम्**[1] | १ | *भाषावेषवपुःक्रियागुणकृतानाश्रित्य भेदान् गतम् ...* |
| | ३ | *प्रज्ञादानदयानुभावधृतयः कान्तिः कलाकौशलम् ...* |
| | ६ | *उद्भिन्नश्रमवारिबिन्दु वदनं सभ्रूलताविभ्रमम् ...* |
| | १७ | *आस्थाय प्रयतो महाव्रतमिदं बालेन्दुचूडामणिः ...* |
| | २० | *निर्विष्टोज्झितचित्रचीवरधरो रूक्षैर्नितान्ताकुलैः ...* |

[1] “शार्दूलविक्रीडितं म्सौ ज्सौ तौ गादित्यऋषयः” (छन्दःशास्त्रम् ७।२२)

| | | |
|---|---|---|
| **इन्द्रवज्रा**[2] | २ | *उद्भिन्नरोमाञ्चकपोलरेखम् ...* |
| **अनुष्टुप् (श्लोकापरपर्याय** | ४ | *आकरे सूक्तिरत्नानाम् ...* |
| | १२ | *वेदान्तेभ्यो गृहीत्वार्थान् ...* |
| | १६ | *आवृतं बहिरन्तश्च ...* |
| | १८ | *अजिह्मैः सारगुरुभिः ...* |
| | २२ | *विरोधः पूर्वसम्बद्धः ...* |
| **आर्या**[4] | ५ | *संप्रति सङ्गीतधनः कविगुणकथयास्मि निघ्नतां नीतः ...* |
| | ११ | *येन मम पानभोजनशयनेषु नितान्तमुपकृतं शुचिना ...* |
| | १४ | *तां क्षौरिकस्य दासीं मम दयितां चीवरान्तदर्शितया ...* |
| **वसन्ततिलका**[5] | ७ | *पेया सुरा प्रियतमामुखमीक्षितव्यम् ...* |
| | १० | *मिथ्या त्रिलोचनविलोचनपावकेन ...* |
| **उपजातिः**[6] | ८ | *कार्यस्य निःसंशयमात्महेतोः सरूपतां हेतुभिरभ्युपेत्य...* |
| | १३ | *दृष्टानि वस्तूनि महीसमुद्रमहीधरादीनि महान्ति मोहात् ...* |
| **मालिनी**[7] | ९ | *अनतिशयमनन्तं सौख्यमप्रत्यनीकम् ...* |
| **उपेन्द्रवज्रा**[8] | १५ | *यदेतदासीत् प्रथमं स्वभावतः ...* |
| **वंशस्था**[9] | १९ | *गहीदशूळा बहुवेशधाळिणो [10] ...* |
| **रुचिरा**[11] | २१ | *चिरं मया चरितमखण्डितं तपः ...* |

[2] "इन्द्रवज्रा तौ ज्गौ ग्" (छन्दःशास्त्रम् ६।१५)

[3] "श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्। द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः॥" इति श्रुतबोधकारिका। (१०)

[4] "यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि। अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या" इति श्रुतबोधे। (४)

[5] "वसन्ततिलका त्भौ जौ गौ" (छन्दःशास्त्रम् ७।८)

[6] "आद्यन्तावुपजातयः" (छन्दःशास्त्रम् ६।१७)

[7] "मालिनी नौ म्यौ य्" (छन्दःशास्त्रम् ६।१४)

[8] "उपेन्द्रवज्रा ज्तौ ज्गौ ग्" (छन्दःशास्त्रम् ६।१६)

[9] "वंशस्था ज्तौ ज्रौ" (छन्दःशास्त्रम् ६।२८)

[10] उन्मत्तकपात्रमुखोद्गतोऽयं श्लोकः। अस्य संस्कृतानुवादे तुच्छन्दो भज्यत इति प्राकृतमूलमेवात्रोल्लिखितम्। एतद्विहाय सर्वेऽप्यन्ये श्लोकाः संस्कृतभाषया ग्रथितास्तेषां सूत्रधारकापालिकपाशुपतान्यतममुखेरितत्वात्।

[11] "रुचिरा ज्भौ स्जौ ग् चतुर्नवकौ" (छन्दःशास्त्रम् ७।२)

| | | |
|---|---|---|
| **स्रग्धरा**[12] | २३ | *शश्वद् भूत्यै प्रजानां वहतु विधिहुतामाहुतिं जातवेदाः ...* |

[12] “स्रग्धरा भ्रौ भ्नौ यौ य् त्रिःसप्तकाः” (छन्दःशास्त्रम् ७।२५)

## II. कवेः सूक्ष्मदृष्टिः

### i. लोकावलोकनम्

आ कर्णाटकदेशात् प्रसृतच्छत्रच्छायस्य, नाना-परिजनैरनवरतं सेव्यमानस्य, विद्वन्निकरालङ्कृत-परिषदो, विविधप्रौढतत्त्वार्थविवादशीलस्य महा-राजस्यापि कवेरस्य, निजप्रजानां पानभोजन-शुष्ककलहाद्यासु व्यवहारदशासु सूक्ष्मज्ञानं गम्यतेऽस्मिन् प्रहसने। उक्तं हि भरतमुनिभि-र्नाट्यस्य स्वरूपं "लोकवृत्तानुकरणं नाट्यम्"[13] इति। तदनुसारम् एतत्प्रहसनप्रणयनकालसम-कालीनानां द्रविडदेशीयानां प्रजानां दैनन्दिन-व्यवहारा मतभेदाश्च प्रकाश्यन्ते कविना। तेषु केचिदत्रोदाह्रियन्ते।

**a)** *"अहो ... विमानशिखरविश्रान्तघनरसित-सन्दिग्धमृदङ्गशब्दस्य ... काञ्चीपुरस्य परा विभूतिः" [८]* इत्यत्र काञ्चीनगरवीथीषु प्रत्यहं प्रकाशम् उपभोग्यानि माल्यापणादीनि सविस्तरम् उपवर्ण्यन्ते।

**b)** *"अहो दर्शनीयानि प्रहतमर्दलकरणानुगतानि विविधाङ्गहारवचनभ्रूविकाराणि उच्छ्रितैकहस्ता - वलम्बितोत्तरीयाणि विगलितवसनप्रतिसमाधान-क्षणविषमितलयानि व्याकुलितकण्ठगुणानि मत्त-विलासनृत्तानि" [९]* इत्यत्र सुरापणे वारुणीमद-विह्वलानां चेष्टाश्च सरसतयालिख्यन्ते।

**c)** कपालभ्रंशम् आलक्ष्य केन वा तद्गृहीतम् इति पृष्टवता कापालिकेनानालोच्यैव *"तर्कयामि शूल्यमांसगर्भत्वाच्छुना वा शाक्यभिक्षुणा वेति" [११]* इत्युच्यते। ईदृशेनाविचारणपूर्वकेण दोषख्यापनेन शाक्येषु काचिदनादरबुद्धिः तत्काले प्रसिद्धा स्यादिति ज्ञायते। एतदनुरूपतया चोपनिबद्धं तदनुपदमेव प्रविश्यमानस्य मिथ्याचारिणः शाक्यभिक्षोर्वचनं *"...मयाभिमतवर्णगन्धरसो मत्स्यमांसप्रकार-बहुलोऽयं पिण्डपातः समासादितः" [११-१२]* इति।

**d)** कपालिशाक्यभिक्ष्वोः संवादे बौद्धमतप्रवर्तकं बुद्धं विषयीकृत्य—*"वेदान्तेभ्यो गृहीत्वार्थान् यो महाभारतादपि। विप्राणां मिषतामेव कृतवान् कोशसञ्चयम्॥" [१५]* इति कपालिनोदीर्यमाणे निन्दावचसि "विप्राणां मिषताम्" इति षष्ठीविभक्त्या[14], पश्यन्तं वैदिकग्रन्थगोप्तारं विप्रकुलमनादृत्यैव वेदशास्त्रोक्तानर्थान् निज-मतस्य संवर्धनाय चोरयामासेत्यर्थः स्फुरति। अपि चैतादृशविभक्तिप्रयोगान्न केवलं कपालिपात्रनिष्ठः कोपः सुष्ठ्वाविष्क्रियते किन्तु कविनिबद्धवक्तृगतत्वेन, द्रविडदेशेषु अवैदिक-मतसमाक्रान्तेष्वपि राज्ञो महेन्द्रविक्रमवर्मणो वैदिकमार्गविषयिण्यादरपूर्विका निश्चला श्रद्धा व्यज्यते। एवं च परिहासापदेशेन विरचितेनाप्यनेन पद्येन प्रेक्षकाणां प्रजानां सनातनधर्मिणां कृते वैदिकपथः सर्वांशतो मूलभूतत्वं ज्ञाप्यते, तस्मिन् गौरवधीश्च दृढीक्रियते।

**e)** शाक्यभिक्षोः पटान्तात् कपालम् अपहर्तुमुद्युक्तः कपाली तदाच्छेदने व्यापृतः सन्, *"ध्वंसस्व दुष्टकापालिक" [१७]* इत्याक्रन्दता भिक्षुणा निजहस्तपादाभ्यां प्रताडितः पतति। एतद-वलोक्य*"मृतोऽसि दास्याः पुत्र" [१८]* इति देवसोमापि सुराविभ्रमाक्रान्ता शाक्यभिक्षोः केशान् ग्रहीतुं प्रवृत्ता, निरास्पदा भूमौ निपतति। एवं प्रचण्डतां नीतेषु वाक्कलहेषु मदान्धानां स्पर्धिनाम् अनर्थेऽपि शरीराघाते प्रवृत्तिः स्यादिति ज्ञापनेन, तस्मान्निवृत्तिर्बोध्यते कविना।

[13] नाट्यशास्त्रम् (१।११२ – p. १३२)

[14] "षष्ठी चानादरे" अष्टाध्यायी २।३।३८

इत्थं लोकव्यवहारेष्वपि कवेरस्य सूक्ष्मेक्षिका पदे पदेऽस्मिन् प्रहसने सुतराम् आविर्भवति। इत्थं समाजस्यात्यन्ताधमवर्गीयाणाम् आचरणस्य वर्णनं, न हास्यरसोज्जृम्भणमात्रफलकं किन्तु सामान्यप्रेक्षकाणामपि चर्वणयोग्यत्वात् सर्वजनीनं सुगमोपदेशबोधकं च। तथा ह्यालङ्कारिकैः परिगणितेषु काव्यप्रयोजनेषु सदाचारोपदेशः प्राधान्यं भजते। "काव्यं... कान्तासम्मिततयोपदेशयुजे"[15] इति हि प्रोक्तं काव्यप्राकशे। इत्थमेव रूपकस्यास्य धर्मोपदेशबोधकत्वं प्रमुखतया 'न तु रावणादिवद्वर्तितव्यम्' इत्याद्याकारया व्यतिरेक-दृष्ट्यैव भवति[16]; मद्यनिषेवणदम्भचर्यादि-खलजनव्यवहारस्य वर्णनेन दुर्वृत्तानां लोकोपहास्यतापत्तिसूचनपुरःसरम् अधर्मतो निवर्तनात्।

विशेषतस्त्विदं लक्षणीयं यत् कथावस्तुन्यस्मिन् यद्यपि पात्राणां बहुशः परस्परतिरस्कार एव प्रदर्शितस्तथापि निर्वहणसन्ध्यन्ते तेषामेव समेषां कलहबुद्धिपरित्यागपूर्विका मैत्रीभावे प्रवृत्तिरभिवर्णिता कविना। विशिष्य च सुराविभवविभ्रान्तमतिना परोपहासनिरतेनापि कपालिना शाक्यभिक्षवे निजापराधक्षमा संप्रार्थ्यते – *"भो नागसेन! यन्मयापराधः कृतः, तत् प्रसन्नहृदयं त्वामिच्छामि" [२९]* इति। उदारगुणयुक्तेन शाक्यभिक्षुणा चेयं याच्ञा सौजन्येन स्वीक्रियत इत्यत्र सकलप्रजाभरणनिपुणो महाराजः कविः स्वदेशे मतविपर्ययेषु विद्यमानेष्वपि पूर्वविरोधान् सर्वानप्यवमृज्य सौभ्रात्रम् अवलम्बितुं स्वजनान् प्रचोदयामासेति प्रतीयते।

**ii. शास्त्रान्तराणां प्रभावः**

अथान्येषामपि दर्शनानां शास्त्राणां च समुल्लासः कृतिमिमां समुत्कर्षमुन्नयन्, महेन्द्रविक्रमभूपस्य शास्त्रकवित्वं प्रथयति। उक्तं हि ईदृशमेव नानाशास्त्रग्रहणशालित्वं काव्यकारणत्वेन मम्मटाचार्यैः – "निपुणता लोकशास्त्रकाव्याद्य-वेक्षणात्... इति हेतुस्तदुद्भवे"[17] इति। एतदनुसारम् इह रूपके काव्यकारणतया सुतरां भासमानं कवेर्महेन्द्रविक्रमस्य नानाशास्त्रवैचक्षण्यं दिङ्मात्रम् उल्लिख्यते।

**a)** वाचिकाभिनयैः तर्कशास्त्रप्रमेयाणां प्रसङ्गानुरूप-ग्रथनेनैव कवेस्तन्नैपुण्यं सुव्यक्तम्। इदं यथा –

- अर्हतां खण्डने प्रवृत्तेन कापालिकेन *"कार्यस्य निःसंशयमात्महेतोः सरूपतां हेतुभिरभ्युपेत्य। दुःखस्य कार्यं सुखमामनन्तः स्वेनैव वाक्येन हता वराकाः॥" [७]* इति कार्यकारणगुणयो-रनानुरूप्यं नाम दोषः ख्यापितः। अयं च 'कार्यगुणाः कारणगुणान् अनुसरन्ति' इति न्यायमूलकः।
- 'अनृतवचनं भणति', 'बौद्धधर्मं पालयामि' इति स्वस्वपक्षौ कपालिशाक्यभिक्षुभ्याम् उपस्थापितौ श्रुत्वा, पाशुपतेन *"उभयम् अप्युपपन्नम्। कोऽत्र निर्णयोपायः" [२०]* इति विनिगमनाविरहे निवेदिते, *"बुद्धवचनं प्रमाणीकुर्वन् भिक्षुः सुरा-भाजनं गृह्णातीति कोऽत्र हेतुः"* इति शाक्य-भिक्षुणा स्वस्यास्तेये प्रतिज्ञाते, *"नहि प्रतिज्ञा-मात्रेण*

---

[15] काव्यप्रकाशः (१।२)

[16] अभिनवभारत्याः पाठान्तरे, "प्रहसनरूपकेणा-नौचित्यत्यागः सर्वपुरुषार्थेषु व्युत्पाद्यः" इति प्रहसनेन मन्दाधिकारिप्रेक्षकाणामपि असदाचारे निषेधो विशिष्य निर्दिष्टः। (Krishnamoorthy अभिनवभारती ६।४० – p. २९०)

[17] काव्यप्रकाशः (१।३)

*हेतुवादिनः सिद्धिरस्ति"* इति पाशुपतेन तादृशदुष्टहेतुः सद्यः खण्ड्यते।

- यथा वा तत्रैव प्रसङ्गे, शाक्यभिक्षौ स्वकपालविलुण्ठनारोपम् अभियुयुक्षमाणेन कपालिना *"प्रत्यक्षे हेतुवचनं निरर्थकम्" [२०]*

इत्यनेन वचनेन 'अनुमानात् प्रत्यक्षप्रमाणं प्रबलम्'[18] इति न्यायो यथाप्रसङ्गं प्रतिपादितः।

**b)** प्रहसनेऽस्मिन् बौद्धतत्त्वानि वेदान्तार्थाश्च संप्रकीर्णाः, इति नास्तिकास्तिकोभय-दर्शनपारीणत्वम् अस्य कवेः परिदृश्यते। यथा

- *"भाषावेषवपुःक्रियागुणकृतानाश्रित्य भेदान् गतं भावावेशवशादनेकरसतां त्रैलोक्ययात्रामयम्। नृत्तं निष्प्रतिबद्धबोधमहिमा यः प्रेक्षकश्च स्वयं स व्याप्तावनिभाजनं दिशतु वो दिव्यः कपाली यशः॥" [३]* इत्याशीर्वादात्मके माङ्गलिकारम्भपद्ये सर्वलोकव्यापकः स एकोऽपि परमात्मा लीलया निखिलप्रपञ्चरूपेण बहुलीभूय सर्गादिकार्यरूपं नृत्तं प्रसाधयन्, साक्षिरूपः परमेश्वरः सन् जीवान्[19] यशसा कलयत्विति कविना प्रार्थ्यते। अत्र महदद्वैततत्त्वं काव्यनयेन सुललितं प्रकीर्त्यते। निष्प्रतिबद्धबोधमहिमेति विशेषणेन शुद्धं ज्ञानमयं चैतन्यं विवक्ष्यते, ज्ञानस्वरूपत्वात्[20]। प्रेक्षकशब्देन च माया-प्रतिफलितं चैतन्यं विवक्ष्यते, साक्षिभूतत्वात्[21]।
- शाक्यभिक्षुणा स्वचीवरान्ते प्रच्छन्नं किंचिन्नीयमानमवलोक्य निजकपालमिति परिशङ्कमानेन कपालिना *"नूनम् एवमादि-प्रच्छादननिमित्तं बहुचीवरधारणं बुद्धेनोपदिष्टम्" [१४]* इत्यवहेलितेन शाक्यभिक्षुणा*"सत्यमेतत्"* इत्यङ्गीकृते, पुनस्तेनैव कपालिना*"इदं तत् संवृतसत्यम्। परमार्थसत्यं श्रोतुमिच्छामि"* इत्युच्यते। अत्र शून्यवादमतानुसारं सत्ताया द्वैविध्यं[22] हास्यप्रयोजकतया समुपात्तम्।
- स्वस्य दयाविरहे वीतरागत्वमेव कारणम् इत्याग्रहवन्तं कपालिनं प्रति शाक्यभिक्षोरुपपन्नं प्रत्युत्तरम्*"एवं वीतरागिणा वीतरोषेणापि भवितव्यम्" [१६]* इत्यत्र वीतक्रोधत्वम् अपि स्थितप्रज्ञलक्षणत्वेन परिगणितम् इति स्मार्य्यते।

**c)** पुराणेतिहासादिकथास्वपि कवेरस्य व्युत्पत्तिः संदृश्यते। यथा

---

[18] उत्तरनैषधस्य व्याख्याने नारायणपण्डितेनोल्लिखितं "प्रत्यक्षानुमानविरोधे प्रत्यक्षं बलीयः" इति। (१७।४५ – p. ४४४)

[19] "*द्वा सुपर्णा* सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति" इति मुण्डकोपनिषदि तृतीयमुण्डकस्यादौ संसारिणो जीवात्मनः कर्मफलभोक्तृत्वं, कर्मबन्धरहितस्य परमेश्वरस्य तु साक्षिभूतत्वम् उक्तम्। (३।१।४४)

[20] "सत्यं ज्ञानमनन्तं ब्रह्म" इति तैत्तिरीयोपनिषदि। (२।१।१)

[21] "साक्षी चाविद्यावृत्तिप्रतिविम्बितचैतन्यम्" इत्यद्वैत-सिद्धेः प्रथमपरिच्छेदे अविद्याप्रतीत्युपपत्तिखण्डे। (p. १३८)

[22] "द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना। लोक<u>संवृतसत्यं</u> च <u>सत्यं च परमार्थतः</u>॥" इति शून्यवादप्रवर्तकाचार्येण नागार्जुनेन विरचितायाम् मध्यमकशास्त्रवृत्तावार्यसत्यपरीक्षेति प्रकरणे सत्यस्य द्विविधता प्रोक्ता। (२४।८)

- कापालिकाकर्षितनिजचीवरान्तेन शाक्यभिक्षुणा निःशरणेन*“नमो बुद्धाय”* इत्याक्रोशिते, *“नमः खरपटायेति वक्तव्यं, येन चोरशास्त्रं प्रणीतम्। अथवा खरपटादप्यस्मिन्नधिकारे बुद्ध एवाधिकः [१५]* इत्याक्षेपद्वयेन कपालिना निष्करुणं परिहसितम्। खरपटशास्त्रम् इति[23] पुरा प्रसिद्धं चौर्यशास्त्रं कर्णीसुतनामकेन ग्रन्थकर्त्रा प्रणिन्ये, यस्य स्वयं खरपटाख्यापि प्रसिद्धा[24]। (खरपट इति शब्दस्तु तमिऴ्-भाषास्थायाः करवट इति संज्ञाया विकृतिरित्युक्तम्। करवटशब्दस्य चोरो वञ्चनाशील इत्यर्थः कोशेषु दृश्यते[25]।)
- आरोपितचौर्यापराधादात्मानं मुमुक्षुणा शाक्यभिक्षुणा भिक्षाभाजनस्य स्वत्त्वं निरुरूपयिषता*“अस्य संस्थानपरिमाणं केन निर्मितम्” [१३]* इति पृष्टे, कपालिना*“ननु मायासन्तानसम्भवाः खलु भवन्तः”* इति सत्वरं प्रतिब्रूतम्। अत्र बुद्धो राज्ञः शुद्धोदनस्य स्वपत्न्यां मायादेव्यां संभूत इति बुद्धस्य चरित्रम्[26] आदाय श्लिष्टशब्दप्रयोगेण, बुद्धमतानुगतानामपि मायाजालेषु निष्णातत्वे किमाश्चर्यम् इत्युपहासः कृतः।
- *“आस्थाय प्रयतो महाव्रतमिदं बालेन्दुचूडामणिः स्वामी नो मुमुचे पितामहशिरश्छेदोद्भवादेनसः। नाथोऽपि त्रिदिवौकसां त्रिशिरसं त्वष्टुस्तनूजं पुरा हत्वा यज्ञशतेन शान्तदुरितो भेजे पुनः पुण्यताम्॥” [२२]* इति श्लोकेन शिवदेवेन्द्रयो-ब्रह्महत्यादुरितापनोदनोदन्तौ[27,28] उपनिबद्ध्येते।
- *“विरोधः पूर्वसम्बद्धो युवयोरस्तु शाश्वतः। परस्परप्रीतिकरः किरातार्जुनयोरिव॥” [२९]* इति वैरप्रशमनपूर्वके सख्यपरिग्रहे, पाशुपतास्त्रलाभ-बीजकस्य किरातार्जुनचरित्रस्योपमानतया, परमशिवोपासकेन पाशुपतपात्रेण परामर्शो नूनमुपपद्यत एव[29]।

---

23 *“களவு காண்டற் குரியநூலைக் **கரவடசாத்திர-மென்பர்** தக்க யாகப்பரணி உரையாசிரியர். இந்நூல் தந்திர கரணமென்றும் ஸ்தேய சாஸ்திரமென்றும் வழங்கப்படும். இதைனச் செய்தவர் கர்ணீஸுத-ரென்பவர்.”* इति मदुरैक्काञ्चीति तमिऴ्ग्रन्थस्य व्याख्याने समुल्लिखितम्। (p. 163)

24 “कर्णीसुतः करवटो मूलदेवः कुलाङ्कुरः” इति वामनभट्टबाणस्य शब्दरत्नाकरे पङ्क्तिः। (p. १८९) शब्दस्यास्य प्रयोगेषु ककारखकारावुभावपि दृश्येते।

25 The Coronation Tamil Dictionary (p. 408)

26“प्रियः शरच्चन्द्र इव प्रजानां शुद्धोदनो नाम बभूव राजा॥ तस्येन्द्रकल्पस्य बभूव पत्नी दीप्त्या नरेन्द्रस्य समप्रभावा। पद्मेव लक्ष्मीः पृथिवीव धीरा मायेति नाम्नानुपमेव माया॥” इत्यश्वघोषेण बुद्धचरिते बुद्धस्य पितरौ प्रगीयेते। (१।१-२)

27 “दिगम्बरो मुक्तजटाकलापो वेदान्तवेद्यो भुवनैक-भर्ता। स ईश्वरो ब्रह्मकपालधारी ... स ईश्वरो भिक्षुरूपी महात्मा भिक्षाटनं दारुवने चकार” इति श्रीस्कन्दपुराणे माहेश्वरखण्डे षष्ठाध्याये ब्रह्ममूर्धोत्पाटनोत्पन्नकल्मषपरिहाराय परमशिवस्य भिक्षाटनम् आख्यातम्। (१।६।३-४)

28 “तत्राश्वमेधः सुमहान्महेन्द्रस्य महात्मनः। ववृते पावनार्थं वै ब्रह्महत्यापहो नृप” इति महाभारतस्योद्योगपर्वणि देवेन्द्रस्य ब्रह्महत्या-परिहारकथोपवर्ण्यते। (५।१३।१८)

29 किरातार्जुनचरित्रं महाभारते वनपर्वण्युक्तं “यथागतङ्गते शक्रे भ्रातृभिः सह सङ्गतः” इत्यतः षड्त्रिंशता श्लोकैः (३।१६८।१-५६)।

एवमादिभिरुदाहरणैः स्फुटं यन्न केवलं कविरयं नैकशास्त्रपारङ्गतः, परं तदानीन्तना रूपक-प्रेक्षकाः पामरजना अपि शास्त्रार्थेषु परिचयवन्तो बभूवुरिति। अन्यथा प्रहसनस्यास्य प्रयोगायोग्यतापत्तेः, अनास्वाद्यताप्रसङ्गाच्च।

## III. उपसंहारः

इत्थं, विनोदमयेन कथवस्तुना तदनुरूपपात्रै रसभाववाचिकाभिनयैः काव्यालङ्कारादिभिश्च भरितं महेन्द्रविक्रमकविकृतं मत्तविलासाख्यं रूपकम् अद्य यावदादर्शप्रहसनम् इति काव्यजगति रसिकजनैर्जेगीयमाना कांचिदुन्नतां पदवीम् अर्हतीतित्यत्र संशयलेशोऽपि न विद्यते।

एवं मत्तविलासप्रहसनस्य परिशीलनेयम्, अस्मद्गुरुवर्याणां गायत्रीमहाभागानां समग्र-प्रहसनपाठनपूर्वकेण प्रतिपदमार्गदर्शनेन च निर्वृत्ता, सहृदयपरिषदे परीक्षणाय सप्रणामं सादरं समर्प्यते।

*नित्यं मद्यनिषेवणैकनिरतः कापालिको नायकः*

*शास्त्रज्ञश्च महेन्द्रविक्रममहीपालो गुणाढ्यः कविः।*

*श्रीकाञ्चीपुरवीथिकाः सहृदयस्वान्तञ्च हास्यश्रिया*

*पूर्णं मत्तविलासरूपकमिदं संरञ्जयद्राजताम्॥*

॥इति शम्॥

## IV. सन्दर्भसूची


१) Aiyar, U Ve Caminata. *MaturaikkAnjci, with the Notes of NaccinArkiniyar*. Project Madurai, 1998-2015, http://www.projectmadurai.org/.

२) Apparao, Ponangi Sri Rama, and Rāmakr̥ṣṇakavi, Mānavalli. Collected Papers of Mānavalli Rāmakrishna Kavi. India, Telugu University, 1986.

३) Ganapati Sâstrî, T., editor. *The Mattavilâsaprahasana of Srî Mahendravikramavarman*. Government of His Highness the Maharajah of Travancore, 1917.

४) Gayathri, P.R. *मत्तविलासप्रहसनम् – पाठः १ (Tamil Lecture)*. Lectures on Sanskrit texts, https://www.youtube.com/watch?v=UZd1yS kXaRc&t=654s.

५) Karmarkar, Raghunath Damodar, editor. *Kāvyaprakāśa of Mammaṭa with the Sanskrit Commentary Bālabodhinī by the Late Vamanacharya Bin Ramabhaṭṭa Jhalakikar*. 5th ed., Bhandarkar Institute Press, 1933.

६) Kedāranāth, Paṇḍit, editor. *The Chhandas Śāstra by Śrī Piñgalanāga with the Commentary Mṛitasañjīvanī by Śrī Halāyudha Bhaṭṭa*. 3rd ed., Pāndurang Jāwajī, Proprietor of the "Nirṇaya Sāgar" Press, Bombay, 1938.

७) Krishnamoorthy, K., editor. *Nāṭyaśāstra of Bharatamuni with the Commentary Abhinavabhāratī by Abhinavaguptācārya*. 4th ed., Karnatak University, Dharwad, 1992.

८) Pandey, Gopal Dutt. *Aṣṭādhyāyī of Pāṇini*. Chaukhamba Surabharatu Prakashan.

९) Röer, E. (Ed.). (1855). *The Uttara Naishadha Charita, by Śrī-Harsha with the commentary of Nārāyaṇa*. Asiatic of Society of Bengal.

१०) Skanda Puranam First Volume Maheshwarkhand By Shrimanmaharsi Krishna Dwaipayan Vedavyas. Vol. 1, 5, Olive-Row Calcutta-1, 1959.

११) *The Coronation Tamil Dictionary*. 6th ed., P. V. Namasivaya Mudaliyar, 1928.

१२) Vaidya, P. L. *Madhyamaka Sāstra of Nāgārjuna with the Commentary Prasannapadā by Candrakīrti*. The Mithila Institute of Post-Graduate Studies and Research in Sanskrit, 1960.

१३) Vāmana Bhaṭṭa Bāṇa. शब्दरत्नाकरः. India, Mithilā Vidyāpīṭhapradhānena, 1965.

१४) Vyasacharya, T. R. Krishnacharya T. *Srimanmahabharatam A New Edition Mainly Based on South Indian Texts with Footnotes and Readings Udyogaparva V.* Javaji Dadaji's "Nirnaya-sagar" Press, 1907.

१५) Vyasacharya, T. R. Krishnacharya T. *Srimanmahabharatam A New Edition Mainly Based on South Indian Texts with Footnotes and Readings Vanaparva III.* Javaji Dadaji's "Nirnaya-sagar" Press, 1908.

१६) चौधरी सूर्यनारायण. *अश्वघोष-कृत बुद्धचरित*. संस्कृत-भवन, कठोतिया, जनवरी १९५५.

१७) तैत्तिरीयोपनिषत् सटिप्पणीसंस्कृतहिन्दीटीकाद्वयसंवलितशाङ्करभाष्यसमेता. श्री कैलास आश्रम शताब्दी समारोह महासमिति कैलास गेट, हृषीकेश.

१८) भगीरथात्मजहरिप्रसादशर्मा. श्रीमत्कालिदासविरचितः श्रुतबोधः. जावजी दादाजी इत्येतेषां निर्णयसागराख्यमुद्रयंत्रालय.

१९) भरतमुनिः. *नाट्यशास्त्रम् अभिनवगुप्तप्रणीताभिनवभारतीसहितम् – तस्य प्रथमो भागः*, साहित्याचार्यमधुसूदनशास्त्रिभिः संपादितम्, काशीहिन्दूविश्वविद्यालयः.

२०) मुण्डकोपनिषद् सानुवाद शाङ्करभाष्यसहित. गीताप्रेस गोरखपुर.

२१) हरिहरशास्त्री, editor. अद्वैतसिद्धिः. श्रीविद्यामुद्राक्षरशाला, कुम्भघोण.

## About the Author



**Ms. Kamakshi Ramanarayanan**, has completed BA in Sastri and MA in Acharya from the Saṃskṛta Sāhitya Śāstra from the National Sanskrit University, Tirupati (erstwhile Rashtriya Samskrta Vidyapeetha, Tirupati). She is studying kāvyas and Sāhitya Śāstra under Smt. Visalakshi Sankaran and Smt. P.R. Gayathri.

# Veda Samskruti Samiti

13-1-62 & 13-1-47/1
Veenapani Nagar, Malkajgiri
HYDERABAD Telangana

Veda Samskruti is an inherent intellectual property of Bhaarata dEsham. It is the basic duty and right of every citizen in Bhaarata dEsham to protect this Intellectual property. Indian Constitution and Law provides provision for protection and preservation of its culture, its monuments, architecture etc.

The Chaturvedas said to have 1131 shaakhaas right up to the time of Aadi Shankaraachaarya and thereafter during last more than ten centuries, many shaakhaas are out of practice due to various reasons and presently only seven shaakaas are in the practice of Guru shiShya parampara.

There is a need to continuously preserve these available shaakhaas which may likely to disappear in future due to various external forces acting in the country vigorously with the power of money and global politics. It is time for the intellectuals of Bharata dEsham to wake-up and work collectively to protect and preserve Veda Samskruti of Bharata dEsham, by empowering the Youth of Bharat dEsham, the future care takers of this great Indian Heritage , with suitable education of our correct history and culture.

The above background lead to formation of this Veda Samskruti Samiti which is registered under Societies acts of Government of Telangana, with Regd. No. 961/2016 by Sri A.H. Prabhakara Rao, who is the Founder and President of the Samiti.

The **vEda vaaNee** e-journal, ISSN 2583-9020, is now publishing its **Volume 2, Issue 3, October 2024.**